श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ द्विपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्विपञ्चाशः सर्गः ॥

## अयोध्याया राजभवने प्रविष्टेन लक्ष्मणेन खिन्नं श्रीरामं दृष्ट्वा तस्मै सान्त्वनादानम्

तत्र तां रजनीमुष्य केशिन्यां रघुनन्दनः।
प्रभाते पुनरुत्थाय लक्ष्मणः प्रययौ तदा ॥ **7.52.1** ॥

ततोऽर्धदिवसे प्राप्ते प्रविवेश महारथः।
अयोध्यां रत्नसम्पूर्णां हृष्टपुष्टजनावृताम् ॥ **7.52.2** ॥

सौमित्रिस्तु परं दैन्यं जगाम सुमहामतिः।
रामपादौ समासाद्य वक्ष्यामि किमहं गतः ॥ **7.52.3** ॥

तस्यैवं चिन्तयानस्य भवनं शशिसन्निभम्।
रामस्य परमोदारं पुरस्तात् समदृश्यत ॥ **7.52.4** ॥

राज्ञस्तु भवनद्वारि सोऽवतीर्य नरोत्तमः।
अवाङ्मुखो दीनमनाः प्रविवेशानिवारितः ॥ **7.52.5** ॥

स दृष्ट्वा राघवं दीनमासीनं परमासने।
नेत्राभ्यामश्रुपूर्णाभ्यां ददर्शाग्रजमग्रतः ॥ **7.52.6** ॥

जग्राह चरणौ तस्य लक्ष्मणो दीनचेतनः।
उवाच दीनया वाचा प्राञ्जलिः सुसमाहितः ॥ **7.52.7** ॥

आर्यस्याज्ञां पुरस्कृत्य विसृज्य जनकात्मजाम्।
गङ्गातीरे यथोद्दिष्टे वाल्मीकेराश्रमे शुभे॥ **7.52.8**॥

तत्र तां च शुभाचारामाश्रमान्ते यशस्विनीम्।
पुनरप्यागतो वीर पादमूलमुपासितुम्॥ **7.52.9**॥

मा शुचः पुरुषव्याघ्र कालस्य गतिरीदृशी।
त्वद्विधा नहि शोचन्ति बुद्धिमन्तो मनस्विनः॥ **7.52.10**॥

सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः।
संयोगा विप्रयोगान्ता मरणान्तं च जीवितम्॥ **7.52.11**॥

तस्मात् पुत्रेषु दारेषु मित्रेषु च धनेषु च।
नातिप्रसङ्गः कर्तव्यो विप्रयोगो हि तैर्ध्रुवम्॥ **7.52.12**॥

शक्तस्त्वमात्मनाऽऽत्मानं विनेतुं मनसा मनः।
लोकान् सर्वांश्च काकुत्स्थ किं पुनः शोकमात्मनः॥ **7.52.13**॥

नेदृशेषु विमुह्यन्ति त्वद्विधाः पुरुषर्षभाः।
अपवादः स किल ते पुनरेष्यति राघव॥ **7.52.14**॥

यदर्थं मैथिली त्यक्ता अपवादभयान्नृप।
सोऽपवादः पुरे राजन् भविष्यति न संशयः॥ **7.52.15**॥

स त्वं पुरुषशार्दूल धैर्येण सुसमाहितः।
त्यजेमां दुर्बलां बुद्धिं सन्तापं मा कुरुष्व ह॥ **7.52.16**॥

एवमुक्तः स काकुत्स्थो लक्ष्मणेन महात्मना।
उवाच परया प्रीत्या सौमित्रिं मित्रवत्सलः॥ **7.52.17**॥

एवमेतन्नरश्रेष्ठ यथा वदसि लक्ष्मण।
परितोषश्च मे वीर मम कार्यानुशासने॥ **7.52.18**॥

निवृत्तिश्चागता सौम्य सन्तापश्च निराकृतः।
भवद्वाक्यैः सुरुचिरैरनुनीतोऽस्मि लक्ष्मण॥ 7.52.19 ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्विपञ्चाशः सर्गः॥